पातित्यकारणं यथा, मात्स्ये २०१ अध्याये ।
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
पतिता यथा,—
"गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः ।
क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ।
कुशिल्पजीविनश्चैव सूनालङ्कारकारिणः ॥"
तथा,—
"ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥"
तेषां दाहादिनिषेधो यथा,—
"पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ॥"
इति शुद्धितत्त्वे ब्रह्मपुराणम् ॥ * ॥
तेषां संसर्गनिषेधो यथा, वराहपुराणे ।
"आसनशयनाच्चैनं भोजनात् कथनादिषु ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥"
प्रायश्चित्तेतरवैदिककर्म्मानधिकारी सन् नरकभागी । यथा,—
"पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम् ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥
याजनाध्यापनाद्यौनात्त्वासपानाशनासनात् ।
यो येन पतितेनैव संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये ॥"
तेषामुदककार्य्यं यथा,—
"पतितस्योदकं कार्य्यं सपिण्डैर्ब्राह्मणैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ ॥
दासीघटमयं पूर्णं पर्य्यस्येत् प्रेतवत् सदा ।
अहोरात्रमुपासीनं नाशौचं ब्राह्मणैः सह ॥
निवर्त्तयेरंस्तस्मात्तु सम्भाषणसहासनम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
अत्याज्या पतिता यथा, मत्स्यपुराणे ।
"पतिता गुरवस्त्याज्या न तु माता कदाचन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥"
द्वादशवार्षिकव्रतनाश्यपापयुक्तः । तस्य और्द्धदेहिकविधिर्यथा, "पूर्व्वोक्तचात्महादेः दाहाशौचादिनिषेधस्तदानीमेव । वत्सरान्ते तु सर्व्वमौर्द्धदेहिकं कुर्य्यात् ॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्धं संवत्सरात् कुर्यात् सर्व्वमेवौर्द्धदेहिकम् ॥"
इति हेमाद्रौ षट्त्रिंशन्मतात् ॥
एवं म्लेच्छीकृतानामपि । गयाश्राद्धमपि कार्य्यम् ।
"ब्रह्महा च कृतघ्नश्च गोघाती पञ्चपातकी ।
सर्व्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥"
इत्यग्निपुराणात् ॥ * ॥
एवं ब्राह्मेऽपि ।
"क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वात् गयाकूपे स्वबन्धुभिः ॥
मार्त्तण्डपादमूले वा श्राद्धं हरिहरौ स्मरन् ॥"
सूर्यपदे इत्यर्थः ॥ * ॥ तत्र वर्षमध्ये कृत्यमुक्तमपरार्के वायुपुराणे ।
"शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरम् ।
द्वादशाहानि वा कुर्य्यात् शुक्ले च प्रथमेऽहनि ॥"
छागलेयः ।
"नारायणवलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥"
व्यासः ।
"नारायणं समुद्दिश्य शिवं वा यत् प्रदीयते ।
तस्य शुद्धिकरं कर्म्म तद्भवेन्नैतदन्यथा ॥"
स चात्मघातादिप्रायश्चित्तं कृत्वा कार्य्यः । तदुक्तं हेमाद्रौ षट्त्रिंशन्मते ।
"कृत्वा चान्द्रायणं पूर्व्वं क्रिया कार्य्या यथाविधि ।
नारायणवलिः कार्य्यो लोकगर्हाभयात् नरैः ॥
पिण्डोदकक्रियाः पश्चात् वृषोत्सर्गादिकञ्च यत् ।
एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा ॥"
दिवोदासीये वृद्धशातातपस्तु इत्याह ।
"पतिते च मृते शुद्ध्यै प्राजापत्यांस्तु षोड़श ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥"
इदं प्रायश्चित्तार्हपित्रादिविषयम् ।
"इन्द्रियैरपरित्यक्ता ये च मूढ़ा विषादिनः ।
घातयन्ति स्वमात्मानं चाण्डालादिहताश्च ये ॥
तेषां पुत्त्राश्च पौत्त्राश्च दयया समभिप्लुताः ।
यथाश्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे ॥"
इति हेमाद्रौ तेनैवोक्तेः ॥ * ॥
तत्रैव वौधायनोऽपि । नारायणवलिं व्याख्यास्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा वारिमरणं यत्र यस्य तत्र तत्र कुर्व्वीतेति ॥ * ॥ गृह्यपरिशिष्टे तु चण्डालादित्याद्युक्त्वा,—
"दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तन्तु कर्त्तव्यं पुत्त्रैश्चान्द्रायणत्रयम् ॥"
इत्युक्तम् ॥ * ॥ मदनरत्ने ।
"ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा कुर्व्वीतेति ॥" * ॥ मदनरत्ने ब्राह्मे ।
"प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः ।
चण्डालैर्ब्राह्मणैश्चौरैर्निहतो यत्र कुत्रचित् ॥
तस्य दाहादिकं कार्य्यं यस्मान्न पतितस्तु सः ।
चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान् पञ्चदश कृत्वा तु विधिना दहेत् ।
बुद्धिपूर्व्वम्मृतानान्तु त्रिंशत्कृच्छ्रं समाचरेत् ॥"
इत्युक्तम् । स्मृतिरत्नावल्यां तद्द्विगुणं प्रायश्चित्तं कृत्वा अर्व्वागप्यब्दात् सर्व्वं कार्य्यं इत्युक्तम् ।
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यात् दहनादि यथोदितम् ।
कृत्वा नारायणवलिमनित्यत्वात्तदायुषः ॥" इति ॥ इदञ्चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन समुच्चितं कार्य्यम् । अतएव वौधायनेनोक्तम् । द्वादशवर्षाणि त्रीणि वेति । मदनपारिजाते स्मृत्यर्थसारे च ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणवलिः कार्य्य इत्युक्तम् । एवं म्लेच्छीकृतानामपि ॥ * ॥ यत्तु कश्चिदाह । पुत्त्रकृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः । आत्मघाते तु वचनादस्तु । महापातके तु कथं स्यादिति । स स्वयमेव आत्मवधप्रायश्चित्तस्य जातिवधनिमित्तेन समुच्चयं वदन् हृदयशून्य एव । नहि जातिवधनिमित्तं पुत्त्रैः कार्य्यमिति वचनमस्ति पुत्त्रकर्त्तृकसर्व्वप्रायश्चित्तादिविप्लवापत्तेः । प्रागुक्तवौधायनवचनाच्चेति दिक् । इदं प्रायश्चित्तार्हाणामेव । प्रायश्चित्तानर्हाणान्तु पतितोदकमात्रं कार्य्यमिति केचित् । मदनपारिजातादिस्वरसोऽप्येवम् । वस्तुतस्तु तदर्हानर्हयोर्व्वचनेऽनुपादानात् अविशेषात् तत्रापि नारायणवलिर्गयाश्राद्धञ्चेति युक्तम् ॥ * ॥ पतितोदकविधिस्तु मित्राद्यतिरिक्तविषय इत्यपरे । स यथा । हेमाद्रौ ब्राह्मे ।
"पतितस्य तु कारुण्यात् यस्तृप्तिं कर्त्तुमिच्छति ।
स हि दासीं समाहूय सर्व्वगां दत्तवेतनाम् ॥
अशुद्धघटहस्तान्तां यथावृत्तं ब्रवीत्यपि ।
हे दासि ! गच्छ मूल्येन तिलानानय सत्वरम् ॥
तोयपूर्णं घटञ्चेमं सतिलं दक्षिणामुखी ।
उपविष्टा तु वामेन चरणेन ततः क्षिप ॥
कीर्त्तयेः पातकिसंज्ञां त्वं पिबेति मुहुर्व्वद ।
निशम्य तस्य वाक्यं सा लब्धमूल्या करोति तत् ॥
एवं कृते भवेत्तृप्तिः पतितानां न चान्यथा ॥"
इति ।
इदञ्च मृताहे कार्य्यम् । पतितस्य दासी मृताह्नि यदा घटमपवर्जयेदेतावतायमुपचरितो भवतीति मदनरत्ने विष्णूक्तेः । इदञ्चात्मत्यागिविषयम् । आत्मत्यागिनः पतितास्तेनाशौचोदकभाजः स्युरित्युपक्रम्य विष्णुना एतस्याभिधानादिति गौड़ाः । उपलक्षणत्वात् सर्व्वेषामिति तु युक्तम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥

पतिवत्नी, स्त्री, (पतिर्विद्यते यस्याः । पति + मतुप् । "अन्तर्वत्पतिवतोर्नुक् ।" ४ । १ । ३२ । इति निपातनात् वत्वं नुगागमश्च । ततः । "ऋन्नेभ्यो ङीप् ।" ४ । १ । ५ । इति ङीप् ।) सभर्त्तृका । सधवा । इत्यमरः । २ । ६ । १२ ॥ (यथा, रघुः । १५ । ३५ ।
"इतरेऽपि रघोर्वंश्यास्त्रयस्त्रेताग्नितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विसूनवः ॥")

पतिव्रता, स्त्री, (पतिर्व्रतमिव धर्म्मार्थकामेषु कायवाक्मनोभिः सदोपास्योऽस्याः ।) स्वाम्यनुरक्ता । तत्पर्य्यायः । सुचरित्रा २ सती ३ साध्वी ४ । इत्यमरः । २ । ६ । ६ ॥ एकपत्नी ५ । इति शब्दरत्नावली ॥ तस्या लक्षणं यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"
इति शुद्धितत्त्वम् ॥ * ॥
तस्या माहात्म्यं यथा,—
नारद उवाच ।
"कर्म्मणा केन राजेन्द्र ! तपसा वा तपोधन ! ।
उत्तमाञ्च गतिं याति कृष्णवासः प्रशंस मे ॥
एवमुक्तस्तु धर्म्मात्मा नारदेनाब्रवीत्तदा ।